अर्थशास्त्रं चतुर्थं तु विद्याह्यष्टादशैव तु" हेमा॰ब्र॰ख॰ विष्णुपुरा॰। अङ्गानि अङ्गशब्दे उक्तानि शिक्षादीनिषट् इति अष्टादशसंख्यापूर्त्तिः।

**अष्टादशविवादपद** न॰ ब॰ व॰ कर्म्म॰ संज्ञात्वान्न द्विगुः। ऋणादानादिषु अष्टादशसु विवादस्थानेषु "तानि च मनुनोक्तानि यथा "तेषामाद्यमृणादानं निःक्षेपोऽस्वामिविक्रयः। सम्भूय च समुत्थानं दत्तस्यानपकर्म च। वेतनस्यैव चादानं संविदश्च व्यतिक्रमः। क्रयविक्रयानुशयो विवादः स्वामिपालयोः। सीमाविवादधर्मश्च पारुष्ये दण्डवाचिके। स्तेयञ्च साहसञ्चैव स्त्रीसंग्रहणमेव च। स्त्रीपुंधर्मो विभागश्च द्यूतमाह्वय एव च। पदान्यष्टादशैतानि व्यवहारस्थिताविह"।

**अष्टादशस्मृतिकारिन्** पु॰ ब॰ व॰ कर्म्म॰ संज्ञात्वान्न द्विगुः। विष्णुप्रभृतिषु अष्टादशसु स्मृतिकारकेषु "विष्णुः पराशरो दक्षः संवर्त्तव्यासहारिताः। शातातपोवशिष्ठश्च यमापस्तम्बगौतमाः। देवलः शङ्खलिखितौ भरद्वाजोशनोऽत्रयः। शौनको याज्ञवल्क्यश्च दशाष्टौ स्मृतिकारिणः। हेमा॰ दा॰ ख॰ वृद्धमनुः।

**अष्टादशाङ्ग** पुंन॰ अष्टादश अङ्गानि यत्र। वैद्यकप्रसिद्धे पाचनभेदे तच्च वातादिभेदेन भिन्नभिन्नप्रकारं दर्शितं चक्रदत्तेन। "दशमूली शटी शृङ्गी पौष्करं सदुरालभम्। भार्गी कुटजवीजञ्च पटोलं कटुरोहिणी। अष्टादशाङ्ग इत्येष सन्निपातज्वरापहः। कासहृद्ग्रहपार्श्वार्त्तिश्वासहिक्कावमीहरः १। भूनिम्बदारुदशमूलमहौषधाब्दतिक्तेन्द्रवीजधनिकेभकणाकषायः। तन्द्रीप्रलापकसनारुचिदाहमोहश्वासादियुक्तमखिलं ज्वरमाशु हन्ति २॥ मुस्तपर्पटकोशीरदेवदारुमहौषधम्। त्रिफलाधन्वयासश्च नीलीकम्पिल्लकं त्रिवृत्। किराततिक्तकं पाठाबलाकटुकरोहिणी। मधूकं पिप्पलीमूलं मुस्ताद्यो गण उच्यते। अष्टादशाङ्गमुदितमेतद्वा सन्निपातनुत्। पित्तोत्तरे सन्निपाते हितञ्चोक्तं मनीषिभिः। मन्यास्तम्भे उरोघाते उरःपार्श्वशिरोग्रहे" ३। अन्यविधमप्यन्यत्रोक्तं विस्तरान्न तदुक्तम्।

**अष्टादशोपचार** पु॰ ब॰ व॰ कर्म॰ संज्ञात्वान्न द्विगुः। तन्त्रोक्तेषु आसनादिषु आष्टदशसूपचारेषु यथा "आसनं स्वागतं पाद्यमर्घ्यमाचमनीयकम्। स्नानं वस्त्रोपवीतञ्च भूषणानि च सर्वशः। गन्धपुष्पे तथा धूपदीपावन्नञ्च तर्पणम्। माल्यानुलेपनञ्चैव नमस्कारविसर्जने। अष्टादशोपचारैस्तु मन्त्री पूजां समाचरेत्" तन्त्रसारः।

**अष्टादशोपपुराण** न॰ ब॰ व॰ कर्म्म॰ संज्ञात्वान्न द्विगुः। सनत्कुमारादिषु अष्टादशसु उपपुराणेषु "अन्यान्युपपुराणानि मुनिभिः कथितानि तु। आद्यं सनत्कुमारोक्तं नारसिंहमतः परम्। तृतीयं नारदं प्रोक्तं कुमारेण तु भाषितम्। चतुर्थं शिवधर्माख्यं साक्षान्नन्दीशभाषितम्। दुर्व्वाससोक्तमाश्चर्य्यं नारदोक्तमतः परम्। कापिलं मानवं चैव तथैवोशनसेरितम्। ब्रह्माण्डं वारुणं चाथ कालिकाह्वयमेव च। माहेश्वरं तथा शाम्बं सौरं सर्व्वार्थसञ्चयम्। पराशरोक्तं प्रवरं तथा भागवतद्वयम्। इदमष्टादशं प्रोक्तं पुराणं कौर्म्मसंज्ञितम्। चतुर्द्धा संस्थितं पुण्यं संहितानां प्रभेदतः। हेमा॰ दा॰ ख॰ कूर्म्मपु॰।

**अष्टादिशाब्दिक** पु॰ कर्म्म॰ संज्ञात्वान्न द्विगुः। "इन्द्रश्चन्द्रः काशकृत्स्नापिशिली शाकटायनः। पाणिन्यमरजैनेन्द्रा जयन्त्यष्टादिशाब्दिकाः" इत्युक्तेषु अष्टसु प्रथमशब्दशास्त्रप्रवर्त्तकेषु इन्द्रादिषु।

**अष्टापद** पुंन॰ ब॰ व॰ अष्टौ अष्टौ पदानि पङ्क्तावस्य वृत्तौ संख्या शब्दस्य वीप्सार्थत्वाङ्गीकारः आत्त्वम् अर्द्धर्चादिः। १शारीफलके। अष्टसु धातुषु पदं प्रतिष्ठा यस्य। २स्वर्णे। "आवर्ज्जिताष्टापदकुम्भतोयैः" कुमा॰। "अचेष्टाताष्टापदभूमिरेणुः" माघः। उपचारात् स्वर्णमयेऽपि "अष्टापदेन बलवान् राजा वज्रधरोपमः" इति हरिवंशः ३शरभे ४लूतायाञ्च पु॰। तयोरष्टपदत्वात्। अष्ट यथा स्यात्तथा पद्यते। ५क्रमौ। अष्टसु दिक्षु आपद्यते ६कीलके। अष्टाभिः सिद्धिभिरापद्यते। आ+पद-अप् ३त॰। अणिमाद्यष्टसिद्धियुक्ते ७कैलासे पु॰।

**अष्टापाद्य** त्रि॰ अष्टभिरापद्यते गुण्यते आ+पद—कर्मणि ण्यत्। अष्टभिर्गुणनीये "अष्टापाद्यम् शूद्रस्य स्तेये भवति किल्बिषम्" मनुः।

**अष्टाविंशति** स्त्री अष्टाधिका विंशतिः शा॰ त॰ आदन्तादेशः। (आटाइस) १संख्याभेदे २तत्संख्यान्विते च। विंशच्छब्देन समासे तत्रैव "अष्टाविंशद्दिनम्" भृगुः ज्यो॰। पूरणे डट्। अष्टाविंशः। तत्संख्यापूरणे त्रि॰ स्त्रियां ङीप्। पूरणे तमप् अष्टाविंशतितमः। तत्रैवार्थे त्रि॰।

**अष्टाविंशतितत्त्व** न॰ अष्टविंशतौ स्थानेषु तत्त्वं तत्त्वज्ञानं यतः। रघुनन्दनभट्टाचार्य्यकृते मलमासादिषु अष्टाविंशतिस्थानेषु तत्त्वज्ञापके स्मार्तनिबन्धे। तानि च स्थानानि तेन प्रतिज्ञायां दर्शितानि यथा "मलिम्लुचे दायभागे संस्कारे शुद्धिनिर्णये। प्रायश्चित्ते विवाहे च तिथौ जन्माष्टमीव्रते, दुर्गोत्सवे व्यवहृतावेकादश्यादिनिर्णये। तडागभवनोत्सर्गे वृषोत्सर्गत्रये व्रते। प्रतिष्ठायां परीक्षायां ज्योतिषे